पू(र्व्व)र्व्व:, त्रि, (पूर्व्व निमन्त्रणे निवासे वा+ अच् ।) प्रथम: । (यथा, कुमारे । १ । ५३ ।
"यदैव पूर्व्वे जनने शरीरं
सा दक्षरोषात् सुदती ससर्ज्ज ।
तदा प्रभृत्येव विमुक्तसङ्ग:
पति: पशूनामपरिग्रहोऽभूत् ॥"
यथाच मनु: । २ । १८४ ।
"गुरो: कुले न भिक्षेत न ज्ञातिकुलबन्धुषु ।
अलाभे त्वन्यगेहानां पूर्व्वं पूर्व्वं विवर्ज्जयेत् ॥")
आदि: । (यथा, मनु: । २ । ७४ ।
"ब्राह्मण: प्रणवं कुर्य्यादादावन्ते च सर्व्वदा ।
स्रवत्यनोङ्कृतं पूर्व्वं पुरस्ताच्च विशीर्य्यति ॥")
प्राग्दिग्-देशकाला: । इत्यमर: ॥ (यथा, मनु: । ५ । ९२ ।
"दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत् ।
पश्चिमोत्तरपूर्व्वैस्तु यथायोगं द्विजन्मन: ॥")
समग्रम् । इति तट्टीकायां स्वामी ॥ अग्र: । इति हलायुध: ॥ (यथा, मनु: । २ । ५० ।
"त्रिराचामेदप: पूर्व्वं द्वि: प्रमृज्यात्ततो मुखम् ।
खानि चैव स्पृशेदद्भिरात्मानं शिर एव च ॥")

पूर्व्वगङ्गा, स्त्री, (पूर्व्वा चासौ गङ्गा चेति ।) नर्म्मदानदी । इति हेमचन्द्र: । ४ । १४६ ॥

पूर्व्वज:, पुं, (पूर्व्वं जायते इति । पूर्व्व+जन+ड: ।) ज्येष्ठभ्राता । इत्यमर: ।२।६।४३॥ (पूर्व्वकालोत्पन्ने, त्रि । यथा, महाभारते ।१।१०५।२६ ।
"तामद्भि: परिषिच्यार्त्तां महर्षिरभिवाद्य च ।
मातरं पूर्व्वज: पुत्त्रो व्यासो वचनमब्रवीत् ॥")

पूर्व्वजा:, पुं, (पूर्व्वं पूर्व्वस्मिन् काले जायन्ते इति । जन+ड: ।) दिव्यपितृगण: । तत्पर्य्याय: । पितर: २ चन्द्रगोलस्था: ३ न्यस्तशस्त्रा: ४ स्वधाभुज: ५ कव्यवालादय: ६ । बहुवचनान्तोऽयम् । इति त्रिकाण्डशेष: ॥

पूर्व्वजा, स्त्री, (पूर्व्वं जायते इति । जन+ड: । टाप् ।) अग्रजा । ज्येष्ठा भगिनी । पूर्व्वज इत्यमरदर्शनात् ॥

पूर्व्वजिन:, पुं, (पूर्व्वो जिन: ।) अतीतजिनविशेष: । तत्पर्य्याय: । मञ्जुश्री: २ ज्ञानदर्पण: ३ मञ्जुभद्र: ४ मञ्जुघोष: ५ कुमार: ६ अष्टारचक्रवान् ७ स्थिरचक्र: ८ वज्रधर: ९ प्रज्ञाकाय: १० वादिराट् ११ नीलोत्पली १२ महाराज: १३ नील: १४ शार्द्दूलवाहन: १५ धियाम्पति: १६ खड्गी १७ दण्डी १८ विभूषण: १९ बालव्रत: २० पञ्चचीर: २१ सिंहकेलि: २२ शिखाधर: २३ वागीश्वर: २४ । इति त्रिकाण्डशेष: ॥

पूर्व्वदिक्, स्त्री, (पूर्व्वा दिक् ।) प्राची दिक् । यस्यान्दिशि सूर्य्य उदेति । तदधिपतिरिन्द्र: । तस्या: पर्य्यायादि: पूर्व्वाशब्दे द्रष्टव्य: ॥

पूर्व्वदिक्पति:, पुं, (पूर्व्वदिश: पतिरधिपति: ।) इन्द्र: । इति हेमचन्द्र: । २ । ८७ ॥

पूर्व्वदेव:, पुं, (पूर्व्वश्चासौ देवश्चेति । यद्वा, पूर्व्वं देव इति सुप्सुपेति समास: ।) असुर: । इत्यमर: । १।१।१२ ॥ (नरनारायणावृषी । तत्र द्विवचनान्तोऽयम् । यथा, महाभारते । ५ । ४९ । ५ ।
"तेषां मनश्च तेजश्चाप्याददानाविवौजसा ।
पूर्व्वदेवौ व्यतिक्रान्तौ नरनारायणावृषी ॥")

पूर्व्वदेश:, पुं, (पूर्व्वो देश: ।) प्राचीदिगवस्थितजनपद: । तत्पर्य्याय: । वर्णनि: २ । इति त्रिकाण्डशेष: ॥ यथा,—
"प्राच्यां मागधशोणौ च वारेन्द्रीगौड़राढ़का: ।
वर्द्धमानतमोलिप्तप्राग्ज्योतिषोदयाद्रय: ॥"
इति ज्योतिस्तत्त्वम् ॥

पूर्व्वपक्ष:, पुं, (पूर्व्व: पक्ष: ।) शुक्लपक्ष: । इत्यमर: ॥ (यथा, मनु: । ३ । २७८ ।
"यथा चैवापर: पक्ष: पूर्व्वपक्षाद्विशिष्यते ॥")
शास्त्रीयप्रश्न: । सिद्धान्तविरुद्धकोटि: । तत्पर्य्याय: । चोद्यम् २ । इति त्रिकाण्डशेष: ॥ देश्यम् ३ फक्किका ४ । इति शब्दरत्नावली ॥ (यथा, मार्कण्डेये । १ । ३ ।
"पूर्व्वपक्षोक्तिसिद्धान्तपरिनिष्ठासमन्वितम् ॥"
अधिकरणावयवभेदो व्यवहारविशेष: । यथा, याज्ञवल्क्ये । २ । १७ ।
"पूर्व्वपक्षेऽधरीभूते भवन्त्युत्तरवादिन: ॥")

पूर्व्वपक्षपाद:, पुं, (पूर्व्वपक्ष एव पाद: ।) चतुष्पाद्व्यवहारान्तर्गत: प्रथम: पाद: । तस्य संज्ञान्तरम् । भाषा २ प्रतिज्ञा ३ पक्ष: ४ । इति मिताक्षरा ॥ तत्र बृहस्पति: ।
"पूर्व्वपक्ष: स्मृत: पादो द्विपादश्चोत्तर: स्मृत: ।
क्रियापादस्तथा चान्यश्चतुर्थो निर्णय: स्मृत: ॥
मिथ्योक्तौ च चतुष्पात् स्यात् प्रत्यवस्कन्दने तथा ।
प्राङ्न्याये च स विज्ञेयो द्विपात् संप्रतिपत्तिषु ॥"
यद्यपि संप्रतिपत्तावपि निर्णयोऽस्ति तथाप्युत्तरवादिनैव भावार्थस्याङ्गीकृतत्वेन क्रियासाध्यो न भवतीति द्विपादतोक्ता ॥ * ॥
अथ भाषापाद: । तत्र भाषास्वरूपमाहतु: कात्यायनबृहस्पती ।
"प्रतिज्ञादोषनिर्म्मुक्तं साध्यं सत्कारणान्वितम् ।
निश्चितं लोकसिद्धञ्च पक्षं पक्षविदो विदु: ॥
स्वल्पाक्षर: प्रभूतार्थो नि:सन्दिग्धो निराकुल: ।
विरोधिकारणैर्मुक्तो विरोधिप्रतिरोधक: ॥
यदा त्वेवंविध: पक्ष: कल्पित: पूर्व्ववादिना ।
दद्यात्तत्पक्षसम्बद्धं प्रतिवादी तदोत्तरम् ॥"
प्रतिज्ञा साध्याभिधायिका वाक् । तस्या दोषै: परस्परविरुद्धार्थपदादिभिस्त्यक्तम् । साध्यं साधनार्हाभिमतार्थं पक्षं विदु: । अन्यथा प्रतिज्ञादोषेण साध्यदोष: स्यात् । अतएवोक्तम् ।
"वचनस्य प्रतिज्ञात्वं तदर्थस्य च पक्षता ।
असङ्करेण वक्तव्यं व्यवहारेषु वादिभि: ॥"
वक्तव्ये पक्षप्रतिज्ञे पूर्व्वोक्ते । नारदेनापि ।
"सारस्तु व्यवहाराणां प्रतिज्ञा समुदाहृता ।
तद्धानौ हीयते वादी तरंस्तामुत्तरो भवेत् ॥"
उत्तरो विजयी यद्यप्यत्र साध्यं ज्ञाप्यं तद्विशिष्टधर्म्मी पक्ष इति भेद: । तथाप्यत्र वाक्प्रत्याय्यर्णादिधर्म्मविशेषविशिष्टस्य पक्षतया धर्म्मिणोऽधमर्णादेरेव साध्यत्वात् साध्यपक्षयोरभेदाभिधानम् । अतएव उपसंहारे च एवंविध: पक्ष इति मिताक्षरायान्तु भाषा प्रतिज्ञापक्ष इति नार्थान्तरमित्युक्तम् । भाषार्थसंज्ञा भाषास्वरूपप्रपञ्चमाह स्वल्पाक्षर इति । निराकुल: पौर्व्वापर्य्यविपर्य्यासादिशून्य: ।
"अत्र द्यूते च व्यवहारे च प्रवृत्ते यज्ञकर्म्मणि ।
यानि पश्यन्त्युदासीना: कर्त्ता तानि न पश्यति ॥"
इति गृह्यसंग्रहवचनादुदासीनेभ्यो ज्ञात्वा शोधयेत् । तच्छोधनमाह बृहस्पति: ।
"न्यूनाधिकं पूर्व्वपक्षं तावद्वादी विशोधयेत् ।
न दद्यादुत्तरं यावत् प्रत्यर्थी सभ्यसन्निधौ ॥"
तल्लिखनप्रकारमाह व्यास: ।
"पाण्डुलेख्येन फलके भूमौ वा प्रथमं लिखेत् ।
ऊनाधिकन्तु संशोध्य पश्चात् पत्रे निवेशयेत् ॥"
फलकं काष्ठादिपट्टकम् । कात्यायन: ।
"पूर्व्वपक्षं स्वभावोक्तं प्राड्विवाकोऽथ लेखयेत् ।
पाण्डुलेख्येन फलके तत: पत्रेऽभिलेखयेत् ॥
शोधयेत् पूर्व्वपक्षन्तु यावन्नोत्तरदर्शनम् ।
उत्तरेणावरुद्धस्य निवृत्ति: शोधनं भवेत् ॥
अन्यदुक्तं लिखेदन्योऽन्यदर्थिप्रत्यर्थिनोर्वच: ।
चौरवच्छासयेत्तन्तु धार्म्मिक: पृथिवीपति: ॥"
स्वभावोक्तमकृत्रिमम् । एतच्च स्वरविशेषादिना सुज्ञेयम् । अतएव याज्ञवल्क्य: ।
"छलं निरस्य भूतेन व्यवहारान्नयेन्नृप: ।
भूतमप्यनुपन्यस्तं हीयते व्यवहारत: ॥"
भूतं तत्त्वार्थसम्बद्धम् । यदाह नारद: ।
"भूतं तत्त्वार्थसम्बद्धं प्रमादाभिहितं छलम् ।
किन्तु राज्ञा विशेषेण स्वधर्म्ममभिरक्षता ॥
मनुष्यचित्तवैचित्र्यात् परीक्ष्या साध्वसाधुता ।
सर्व्वेष्वर्थविवादेषु वाक्छलेनावसीदति ॥
पशुस्त्रीभूम्यृणादाने शास्योऽप्यर्थान्न हीयते ॥"
सर्व्वेषु अर्थविवादेषु प्रमादाभिधानेऽपि नावसीदति । अत्रोदाहरणं पशुस्त्र्यादि । अर्थविवादग्रहणान्मन्युकृतविवादेषु प्रमादाभिधाने प्रकृतार्थाद्धीयत इति गम्यते । यथाहमनेन शिरसि पादेन ताड़ित इत्यभिधाय केवलं हस्तेन ताड़ित इति वदन् न केवलं दण्ड्य: पराजीयते च । तथा च त्वं शतं मह्यं ऋणं धारयसि मत्त ऋणत्वेन गृहीतत्वाद्वहनकत्वादित्यादि भाषाशरीरं एतच्च संस्कृतदेशभाषान्यतरेण यथाबोधं वक्तव्यं लेख्यं वा मूर्खाणामपि वादिप्रतिवादित्वदर्शनात् । अतएवाध्यापनेऽपि तथोक्तम् । विष्णुधर्म्मोत्तरे ।
"संस्कृतै: प्राकृतैर्व्वाक्यै: शिष्यमनुरूपत: ।
देशभाषाद्युपायैश्च बोधयेत् स गुरु: स्मृत: ॥"
इति व्यवहारतत्त्वम् ॥

पूर्व्वपदं, क्ली, (पूर्व्वं पदम् ।) परपदप्राग्वर्त्तिविभक्त्यन्तप्रकृति: । यथा पूर्व्वपदात् संज्ञायामग: । इति व्याकरणम् ॥

पूर्व्वपर्व्वत:, पुं, (पूर्व्व: पूर्व्वदिकस्थ: पर्व्वत: । इति नित्यकर्म्मधारय: ।) उदयाचल: । इत्यमर: । २ । ३ । २ ॥